'मद्रे' ॥ ४९ ॥ ७ **अग्निमंथ म०** नरवेल ( कोकणांत प्रसिद्ध ) । **गु०** अरणी । अग्निमंथोऽग्निमथनस्तर्कारी वैजयंतिका । वह्निमंथोरणा केतुः श्रीपर्णी कर्णिका जया ॥ ५० ॥ नादेयी विजयाऽनंता नदीजा 'राजनामके' । जयो जयंती संप्रोक्ता 'भावे' तु गणिकारिका ॥५१॥ अग्निमंथनसंज्ञश्च मंथनो विजयंतिका । तथैव वह्निमथनस्तथा चारणिका मता ॥ ५२ ॥ अरणीकेतुश्च संप्रोक्तो 'धन्वंतरिनिघंटके' । पावकाह्वा च गणिका 'कैये' पावकमंथनः ॥ ५३ ॥ **गुणाः** । तर्कारी कटुरुष्णा च तिक्तानिलकफापहा । शोफश्लेष्माग्निमांद्यार्शोविड्बंधाध्मानहा 'नृपे' ॥ ५४ ॥ आमपांडुहरः प्रोक्तो 'धन्वंतरिनिघंटके' । अग्निदश्चोष्णवीर्यश्च 'कैयदेवनिघंटके' ॥ ५५ ॥ ८ **क्षुद्राग्निमंथ । म०** ऐरण, टाकळी । **गु०** नहानी अरणी । क्षुद्राग्निमंथस्तपनो विजया गणिकारिका ।अरणिर्लघुमंथश्च तेजोवृक्षस्तनुत्वचा ॥ ५६ ॥ प्रोक्तो 'राजनिघंटे' तु रक्तांगो 'धन्वनामके' । हविर्मंथस्तेजोमंथो हरिमंथः कृशानुगः ॥ ५७ ॥ प्रोक्तो 'कैयनिघंटे' तु वैद्यविद्याविशारदैः । जयाह्वाऽरणिका चैव वह्निनिर्मंथना 'गणे' ॥ ५८ ॥ **गुणाः** । क्षुद्राग्निमंथः कथितः पूर्वोक्तगुणवान् 'नृपे' । कटुतिक्तोष्ण चोष्णश्च वातपांडुहरो ध्रुवं ॥ ५९ ॥ शोफश्लेष्माग्निमांद्यघ्नो विबंधामहरो 'धने'। अग्निदश्चोष्णवीर्यश्च कफहा 'कैयदेवके' ॥६०॥ 'द्रव्ये' बलासहा चैव कफमेदोहरो 'गणे'। ९ **श्योनाक । म०** दिंडा । **गु०** अरलु, मरमठय । स्योनाकः शुकनासर्क्षः कट्वंगोऽथ कटंभरः ॥ ६१ ॥ मयूरजंघोऽरलुकः प्रियजीवः कुटंनटः । प्रोक्तो 'राजनिघंटे' तु भिषग्विद्याविशारदैः ॥ ६२ ॥ १० **भूतसार । म०** टेटू पिंवळा टेटू । स्योनाकः पृथुशिंबोऽन्यो भल्लको दीर्घवृंतकः।पीतवृक्षश्च टेंटूको भूतसारो मुनिद्रुमः ॥ ६३ ॥ निःसारः फल्गुवृंताकः पूतिपत्रो वतंसकः । मंडूकपर्णः पीतांगो जंबूकः पीतपादपः ॥ ६४ ॥ वातारिः पीतकः शोणः कुनटश्च विरेचनः । भ्रमरेष्टा बहिर्जंघा 'राजनामनिघंटके' ॥ ६५ ॥ टिंटुको भल्लको भल्लो भूतवृक्षस्तु 'कैयके'।

'कोशे' टुंटुकः पत्रोर्णः शोणकश्चारलुर्नटः॥ ६६ ॥ **गुणाः**। स्योनाकयुगुलं तिक्तं शीतलं च त्रिदोषजित्। पित्तश्लेष्मातिसारघ्नं सन्निपातहरं 'नृपे'॥ ६७॥ टेंटूफलं कटूष्णं च कफवातहरं लघु। दीपनं पाचनं हृद्यं रुचिकृल्लवणाम्लकं॥ ६८॥ पित्तवांतिहरं प्रोक्तं 'द्रव्यनामनिघंटके'। तत्फलं तु भवेद्रूक्षं कफवातविनाशनं॥ ६९॥ हृद्यं कषायं गुल्मघ्नं लघुदीपनमर्शोहृत्। कृमिहृत् वातलं चैव गुरु 'भावप्रकाशके'॥७०॥ पुटपाकप्रयोगेण चिरातिसारजित् ध्रुवं। कफवातहरश्चैव प्रोक्तो 'गणनिघंटके'॥ ७१॥ ११ **मेषशृंगी**। **म०** मेढशिंगी, खरशिंग। **गु०** मेढाशिंग। अजशृंगी मेषशृंगी सर्पदंष्ट्रा च वर्तिका। चक्षुष्या तिक्तदुग्धा च पुत्रश्रेणी विषाणिका॥ ७२॥ प्रोक्ता 'राजनिघंटे' तु विषाणी 'भावनामके'। कूर्चपर्णी मेढ्रवल्ली सुपुच्छिका तु 'कैयके'॥ ७३॥ मेषवल्ली मेषपुष्पा महाकाल्यक्षिभेषजा। प्रोक्ता 'मदनपाले' तु तथा मेषविषाणिका॥ ७४॥ **गुणाः**। अजशृंगी कटुस्तिक्ता कफार्शः शूलशोफजित्। चक्षुष्या श्वासहृद्रोगविषकासार्तिकुष्ठजित्॥ ७५॥ अजशृंगीफलं तिक्तं कटूष्णं कफवातजित्। जठरानलकृत् हृद्यं रुचिदं लवणाम्लकं॥ ७६॥ प्रोक्तं 'राजनिघंटे' तु 'धन्वे' स्वादुर्हिमा तथा। वमितृष्णापहा 'कैये' रूक्षा पित्तव्रणापहा॥ ७७॥ तत्फलं कफमेहघ्नं दीपनं कृमिनाशनं। विषकासहरं प्रोक्तं वैद्यै 'र्भावप्रकाशके'॥७८॥ तिमिरघ्नं कफघ्नं च श्लेष्मपित्तहरं ध्रुवं। वर्णकृत्कामनिघ्नं च प्रोक्तं 'गणनिघंटके'॥ ७९॥ १२ **काश्मरी**। **म०** शिवण। **गु०** शवन्य। काश्मर्यः काश्मरी हीरा कृष्णवृंता तु कट्फला। सर्वतोभद्रिका भद्रा सिंधुपर्णी तु क्षीरिणी॥ ८०॥ सुभद्रा भद्रपर्णी च कंभारी कुमुदा तथा। मधुपर्णी महाभद्रा गोपभद्रा विदारिणी॥ ८१॥ स्वभद्रा रोहिणी गृष्टिः कृष्णा श्वेता च मेदिनी। स्थूलत्वचा मधुमती सुफला सुदृढत्वचा॥८२॥ महाकुमुदनाम्नी च श्रीपर्णी 'राजनामके'। 'धन्वे' प्रोक्ता तु गंभारी काश्मर्या कृष्णवृंतिका॥ ८३॥ 'कैयदेवनिघंटे' तु संप्रोक्ता मुद्रिका

कौटजो शक्रो वत्सको गिरिमल्लिका। कलिंगो मल्लिकापुष्पः प्रावृष्यः शक्रपादपः ॥ १९ ॥ वरतिक्तो यवफलः संग्राही पांडुरद्रुमः। प्रावृषेण्यो महागंधः प्रोक्तो 'राजनिघंटके' ॥ २० ॥ कौटश्चैवेंद्रवृक्षश्च 'धन्वंतरिनिघंटके'। तथा 'मदनपाले' तु कोटी च शत्रुभूरुहः ॥ २१ ॥ शत्रुवृक्षः शत्रुशाखी प्रोक्तो 'भावप्रकाशके'। **गुणाः**। कुटजः कटुतिक्तोष्णः कषायश्चातिसारजित् ॥ २२ ॥ प्रोक्तो 'राजनिघंटे' तु पुरातनचिकित्सकैः। आमहा 'भावनाम्नि' तु ग्राही रक्तार्शहा 'गणे' ॥ २३ ॥ शीतः कुष्ठातिसारघ्नो गुदरोगहरो 'धने'। 'कैये' रूक्षो दीपनश्च कफतृड्जंतुहा ध्रुवं ॥ २४ ॥ तत्पुष्पं वातलं प्रोक्तं पुरातनचिकित्सकैः। १८ **कृष्णकुटज**। म० काळा कुडा। गु० काळो कडो। कृष्णाऽन्यः कुटजश्चैव मल्लिका नीलयष्टिका ॥ २५ ॥ तथैव वंशकुटजः कृष्णशत्रुतरुस्तथा। **गुणाः**। कृष्णशक्राऽस्रपित्तघ्नस्त्वग्दोषार्शोनिकृंतनः ॥ २६ ॥ १९ **इंद्रयव**। म० इंद्रजव। गु० इंदरजव। इंद्रयवा तु शक्राह्वा शक्रबीजानि वत्सकः। तथा वत्सकबीजानि भद्रजा कुटजाफलं ॥ २७ ॥ ज्ञेया भद्रयवा चैवं बीजान्ता कुटजाभिधा। तथा कलिंगबीजानि 'राजनामनिघंटके' ॥ २८ ॥ कलिंगकस्तु 'धन्वंतु यवः' 'कैये' तु कौटजः। इंद्रो यवफलं ऐंद्रयवस्तु 'मदने' तथा ॥ २९ ॥ ततो कूटजबीजं च कलिंगं 'भावनामके'। शक्राशनस्तु शक्राह्वः शतक्रतुयवो 'गणे' ॥ ३० ॥ **गुणाः**। इंद्रयवस्तु संप्रोक्तः कटुतिक्तश्च शीतलः। कफवातहरश्चैव रक्तपित्तविनाशकः ॥ ३१ ॥ दाहातिसारशूलघ्नो नानाज्वरहरो 'नृपे'। गुदकीलास्रभ्रांतिघ्नः प्रोक्तो 'भावप्रकाशके' ॥ ३२ ॥ रक्तार्शोरक्तसारघ्नः कृमिशूलघ्नदीपनः। त्रिदोषहा भिषक्श्रेष्ठैः प्रोक्तो 'धन्वनिघंटके' ॥ ३३ ॥ 'कैये' विसर्पकुष्ठघ्नो वातरक्तहरः स्मृतः। २० **शिरीष**। म० शिरसाचें झाड। गु० शरशडो। शिरीषः सितपुष्पश्च भंडिको मृदुपुष्पकः ॥ ३४ ॥ उद्दानकः शुकतरुर्ज्ञेयो लोमशपुष्पकः। कपीतनः कलिंगश्च श्यामलः शंखिनीफलः ॥ ३५ ॥ मधुपुष्पो वृत्तपुष्पः प्रोक्तो

' राजनिघंटके '। शुकप्रियः श्यामवर्णो ' धन्वन्तरिनिघंटके ' ॥ ३६ ॥ मंडीरो भंडिलो विप्रो प्लवंगश्च कपीतनः। मंडी प्लवंगकः ' केये ' शुकपुष्पः शुकद्रुमः ॥ ३७ ॥ शुकवृक्षो मधुपुष्पः प्रोक्तो ' गणनिघंटके '। **गुणाः**। शिरीषः कटुशीतश्च पामावातविषापहः ॥ ३८ ॥ त्वग्दोषकंडूकुष्ठार्शोनाशनो ' नृपनामके '। लघुर्वर्ण्यस्त्रिदोषघ्नः श्वासकासहरो ' धने ' ॥ ३९ ॥ विसर्पशोथहा प्रोक्तः ' कयदेवे ' भिषग्जनैः । कफपित्तहरः प्रोक्तो ' गणनामनिघंटके ' ॥ ४० ॥ २१ **करंज**। **म०** करंज। **गु०** करंज। करंजो नक्तमालश्च पूतिकश्चिरबिल्वकः। पूतिपर्णो वृद्धफलो रोचनश्च प्रकीर्यकः ॥ ४१ ॥ प्रोक्तो ' राजनिघंटे ' तु 'कोशे' च करजस्तथा। नक्ताव्हो गुच्छपुष्पश्च ' कयदेवनिघंटके '॥४२॥ **गुणाः**। करंजः कटूष्णश्च चक्षुष्यो वातनाशनः। तस्य स्नेहोऽतिस्निग्धश्च वातघ्नः स्थिरदीप्तिदः ॥ ४३ ॥ प्रोक्तो ' राजनिघंटे ' तु ' धन्वे ' वातकफघ्नकः। प्लीहोदावर्तगुल्मघ्नस्तत्फलं कफवातहृत् ॥ ४४ ॥ पित्तलं चाष्टगुल्मघ्नं अर्शोगुल्मविनाशनं। योनिदोषहरः ' केये ' व्रणकृमिहरः स्मृतः ॥ ४५ ॥ पाके रसे कटुस्तिक्तः कषायश्चोष्णवीर्यदः। विषकुष्ठबलासघ्नः कुष्ठपित्तास्रहा ध्रुवं ॥ ४६ ॥ योनिदोषकृमिघ्नश्च तत्पत्रं जंतुनाशनं। कफवातार्शः-शोफघ्नं व्रणहृत् 'कयदेवके' ॥ ४७ ॥ तदंकुरः कटुः पाके रसे दीपनपाचनः। २२ **घृतकरंज**। **म०** चोपडा करंज। **गु०** घोरा करंज। 'नृपे' घृतकरंजः स्यात्प्रकीर्यो घृतपर्णकः ॥ ४८ ॥ स्निग्धपत्रस्तपस्वी च विषारिश्च विरोचनः। ' धन्वे ' गौरस्तथा ' भावे ' घृतपूर्णः प्रकीर्तितः ॥ ४९ ॥ घृतपूरस्तथा प्रोक्तः ' केये ' तु पुष्पमंजरी। **गुणाः**। ततो घृतकरंजस्तु कटूष्णो व्रणवातहा ॥ ५० ॥ विषविसर्पत्वग्दोषनाशनो ' राजनामके '॥ २३ **महाकरंज**। **म०** थोर करंज। **कों०** वावळा। **गु०** चरेल। ज्ञेयो महाकरंजोऽन्यः षड्ग्रंथो हस्तिचारिणी ॥ ५१ ॥ उदकीर्यो विषघ्नी च काकघ्नी मदहस्तिनी। अंगारवल्ली शार्ङ्गेष्टा मधुमत्तश्च वायसी ॥ ५२ ॥ हस्तिरोहणकश्चैव ज्ञेयो हस्तिकरंजकः। सुमना काकभांडी च मदमत्तश्च

A Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

सुवासः सिंधुपुष्पश्च 'धन्वंतरिनिघंटके'। 'भावे' तु प्रियकश्चैव 'कोशे' नीपः प्रियस्तथा ॥ २० ॥ बलभद्रो 'गणे' प्रोक्तः षट्पदाधार एव च। **गुणाः**। कदंबस्तु कटुस्तिक्तः कषायो वातनाशनः॥२१॥ शीतलः कफपित्तघ्नः शुक्रवृद्धिकरो 'नृपे'। सरो विष्टंभकृद्रूक्षः कफघ्नः स्तन्यदो 'मंदे' ॥ २२ ॥ग्राही वर्णकरश्चैव योनिदोषहरो गुरुः। व्रणास्रगुल्मकुष्ठघ्नो दाहास्रविषहृत्तथा ॥ २३ ॥ तत्फलं च भवेत्स्वम्लं रुच्यं वीर्योष्णकं ध्रुवं । श्लेष्मलं गुरु वातघ्नं कफपित्तकरं 'कये' ॥ २४ ॥ **३८ धाराकदंब। म०, गु०** धाराकदंब। धाराकदंबः प्रावृष्यः पुलकी भृंगवल्लभः । मेघागमप्रियो नीपः प्रावृषेण्यः कदंबकः ॥ २५ ॥ 'नृपे' प्रोक्तस्तथा 'धन्व' कादंबर्यो हरिप्रियः। अलिप्रियः 'कयदेवे' तथैव पर्वताह्वयः॥ २६ ॥ तथा गिरिकदंबश्च 'मंदे' चैव महोन्नतः। **३९ धूलिकदंब। म०, गु०** धूलीकदंब। धूलीकदंबश्च फलप्रसूनः परागपुष्पो बलभद्रसंज्ञकः। वसंतपुष्पो मकरंदवासो भृंगप्रियो रेणुकदंबकश्च ॥ २७॥ 'नृपे' 'धन्वे' तु नीपश्च सुवासो वृत्तपुष्पकः ॥ २८ ॥ ततो राजकदंबश्च प्रोक्तो 'मदनपालके'। हलिप्रियः 'कैयदेवे' तथा नतापहारकः ॥ २९ ॥ **४० भूमिकदंब। म०, गु०** भूमिकदंब। भूमिकदंबो भूनीपो भूमिजो भृंगवल्लभः। लघुपुष्पो वृत्तपुष्पो विषघ्नो व्रणहारकः ॥ ३० ॥ **गुणाः**। त्रिकदंबाः कटुवर्ण्या विषशोफहरा हिमाः । कषायास्तिक्तपित्तघ्ना वीर्यवृद्धिकरा 'नृपे' ॥ ३१ ॥ **४१ जलवेतस। म०** जलवेतस, वांजूळ। **गु०** जलवेतस। वानीरो वृत्तपुष्पश्च शाखालो जलवेतसः। व्याधिघातः परिव्याधो नादेयो जलसंभवः ॥ ३२ ॥ 'नृपे' प्रोक्तस्तथा 'धन्वे' संवृतो वंजुलः स्मृतः। जलकामो मेघपुष्पो नादेयी तु निकुंभकः॥ ३३ ॥ तोयकामो नदीकांतो नदीकूलप्रियस्तथा । निकुंजकोऽबुजश्चैव विदुलो बंधुवेतसः ॥ ३४ ॥ सुशीतः क्षीरवृक्षस्तु 'कैयदेवनिघंटके'। 'मदने' तु जलौकश्च निचुलोऽभोज एवच ॥ ३५ ॥ 'भावे' तु जलजश्चैव कुशलो 'गणनामके'। **गुणाः**। वानीरस्तिक्तशिशिरो संग्राही च

कषायकः ॥ ३६ ॥ रक्षोघ्नो व्रणपित्तास्रकफघ्नो ' राजनामके '। वैद्यै- ' मदनपाले ' तु संप्रोक्तो वातकोपनः ॥ ३७ ॥ ४२ **कुंभी** । म० लघु कुंभी, पांढरी कुंभी । **गु०** कुंभी । कुंभी रोमालुविटपी रोमशः पर्पटद्रुमः । **गुणाः** । कुंभी कटुः कषायोष्णो ग्राही वातकफापहः ॥ ३८ ॥ ४३ **वेतसः** । **म०** वेत । **गु०** नेतर । वेतसो निचुलो ज्ञेयो वंजुलो दीर्घ- पत्रकः । कलनो मंजरीनम्रः सुषेणो गंधपुष्पकः ॥ ३९ ॥ प्रोक्तो ' राज- निघंटे ' तु कलंजो ' धन्वनामके ' । रथो नम्रः पत्रमालो वानीर- सत्त्वपुष्पकः ॥ ४० ॥ नादेयो गंधपुष्पश्च सुषेणः ' केयदेवके '। शीतश्चैव तथा प्रोक्तो ' भावनामनिघंटके ' ॥ ४१ ॥ **गुणाः** । वेतसः कटुकः स्वादुः शीतो भूतविनाशनः। कुष्ठघ्नो रक्तपित्तघ्नः प्रोक्तो ' राजनिघंटके ' ॥ ४२ ॥ ' धन्वे ' तिक्तस्तु रक्षोघ्नः कषायी व्रणशोधनः । कफाप- हस्तथा प्रोक्तो वैद्यविद्याविशारदैः ॥ ४३ ॥ ४४ **धवः** । म० धावडा । गु० धावडो । धवो दृढतरुर्गौरः कषायो मधुरत्वचः । शुक्लवृक्षः पांडुतरुर्धवलः पांडुरो ' नृपे ' ॥ ४४ ॥ स्थिरोदृढः शक- टाख्यः शकटाक्षो भरोद्वहः। धुरंधरः ' केयदेवे ' ' भावे ' नंदितरुर्घटः॥४५॥ **गुणाः**। धनकषायः कटुकः कफघ्नोऽनिलनाशनः । पित्तप्रकोपनो रुच्यो दीपनो ' राजनामके ' ॥ ४६ ॥ शीतलो मधुमेहघ्नो पांडुहृत् कफपित्त- हृत् । तिक्तस्त्रिदोषदाहघ्नस्तुवरस्त्वर्शशोफहृत् ॥ ४७ ॥ तच्छाखा तु भवेत्क्षारा वातला नैव संशयः । तत्पत्रं शीतलं प्रोक्तं विपाके कटुकं तथा ॥ ४८ ॥ श्लेष्मपित्तार्शहृच्चैव कदाचिन्नैव वातलं । फलं स्वादु कषायं च रूक्षमम्लं भवेद्ध्रुवम् ॥ ४९ ॥ ' केये ' प्रोक्तं तथा ' भावे ' अश्मरीकृच्छ्रनाशनः । रक्तव्रणविसर्पघ्नो योनिरोगहर- स्तथा ॥ ५० ॥ अतिसारतृषाहृच्च प्रोक्तो वैद्यविशारदैः । ४५ **धन्वनः** । **म०** धामण । **गु०** धामण । धन्वनो रक्तकुसुमो धनुर्वृक्षो महाबलः ॥ ५१ ॥ रुजापहः पिच्छलको रूक्षः स्वादुफलो ' नृप ' । गोत्रद्रुमो गोत्रपुष्पो धर्मणः सारवृक्षकः ॥ ५२ ॥ धन्वांगो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

